कक्षा
10

संस्कृतम्-तृतीय भाषा

# स्पन्दना

कक्षा 10
स्पन्दना

# स्पन्दना

( संस्कृतम्-तृतीयभाषा )

## कक्षा - दशमी

माध्यमिक-शिक्षा-बोर्ड राजस्थानम्, अजयमेरुः

प्रकाशकः
राजस्थान राज्य पाठ्यपुस्तक मण्डलम्, जयपुरम्

# पाठ्यपुस्तक-लेखन-समितिः

## पुस्तकम् - स्पन्दना ( कक्षा - १० )

{माध्यमिक-शिक्षा-बोर्ड राजस्थानम्, अजयमेरुः इत्यस्य अधिकृतं पाठ्यपुस्तकम्}


**डॉ. विक्रम जीतः**
**संयोजकः**
संस्कृत-विभागाध्यक्षः
राजकीयः डूँगर (स्नातकोत्तर) महाविद्यालयः, बीकानेरम्

**डॉ. योगेन्द्र कुमारः भानुः**
संस्कृत-व्याख्याता
महारानी श्री जया महाविद्यालयः, भरतपुरम्

**डॉ. योगेन्द्र कुमारः धामा**
संस्कृत-व्याख्याता
बाबू शोभाराम राज. कला महाविद्यालयः, अलवरम्

**श्री नवीन कुमारः शर्मा**
संस्कृत-व्याख्याता
राज.आ.उ.मा.वि., अजयराजपुरा, सांगानेरम्, जयपुरम्

**श्री केशवरामः डूडी**
वरिष्ठसंस्कृताध्यापकः
राज.उ.मा.विद्यालयः, आँगणवा, जोधपुरम्

# शब्दद्वयम्

पाठ्यपुस्तकमिदं विद्यार्थिनां कृते क्रमबद्धाध्ययन–पुष्टीकरण–समीक्षणादीनाम् आगाम्यध्ययनस्य च आधारः विद्यते। विषयवस्तुनः शिक्षणविधेश्च दृष्ट्या विद्यालयीय–पाठ्यपुस्तकानां स्तरः अत्यन्तं महत्त्वपूर्णः भवति। पाठ्यपुस्तकानि कदापि स्थावराणि वा असन्महिमामण्डनकराणि वा न भवेयुः। अद्यापि पाठ्यपुस्तकं शिक्षणाधिगम–प्रक्रियायाः एकम् अनिवार्यम् उपकरणं विद्यते, यस्य वयम् उपेक्षां कर्तुं नैव शक्नुमः।

विगतवर्षेषु माध्यमिक–शिक्षा–मण्डल–राजस्थानस्य पाठ्यक्रमे भाषागत–सांस्कृतिकस्थितीनां प्रतिनिधित्वस्य अभावः अनुभूयते स्म। एतत् दृष्टिगोचरं कृत्वा राज्यसर्वकारेण नवमी/प्रवेशिका–कक्षातः द्वादशी/वरिष्ठोपाध्याय–कक्षापर्यन्तम् अध्ययनरतानां विद्यार्थिनां कृते माध्यमिक–शिक्षा–मण्डल–राजस्थान–अजयमेरुद्वारा स्वकीयं पाठ्यक्रमं संचालयितुं निर्णयः कृतः।

तदनुसारं बोर्डद्वारा शिक्षणसत्र – २०१७–२०१८ तः दशमी/प्रवेशिका–द्वादशी/वरिष्ठोपाध्याय–कक्षाणां पाठ्यपुस्तकानि निर्धारित–पाठ्यक्रमानुसारं प्रस्तुतानि। आशासे यत् एतानि पुस्तकानि विद्यार्थिषु मौलिक–चिन्तन–मनन–स्वाध्यायाभिव्यक्तीनाम् अवसरान् समुत्पादयिष्यन्ति।

**प्रो. बी.एल. चौधरी**
**अध्यक्षः**
**माध्यमिक–शिक्षा–बोर्ड–राजस्थानम्, अजयमेरुः**

# पुरोवाक्

माध्यमिक-शिक्षा-मण्डल-राजस्थानस्य अधिनिर्देशं दशम-कक्षायै प्रणीतं पुस्तकमिदं जिज्ञासु-बालकानां तेषां शिक्षकाणाञ्च पुरतः समर्पयद्भिरस्माभिः हर्षप्रकर्षोऽनुभूयते।

ज्ञानवर्द्धनं-भाषाबोधनं-संस्काराधानं चेति लक्ष्यत्रयमुद्दिश्य पुस्तक-सर्जनायां प्रवृत्तमस्माभिः। ग्रन्थभीरुबालानां प्रियार्थम् आकारेण लघीयसी खल्वियं पुस्तिका। व्याकरणादियुतं परिशिष्ट-भागं विहाय आहत्य केवलं पञ्चदश पाठाः सन्ति, यत्र गद्यं पद्यं नाट्यं चेति त्रितयं समाहितम्। तत्रापि (पाठ्यवस्तुनि) प्राचीनार्वाचीनयोः सामञ्जस्यम्। करुणा, त्यागः, प्रेम, विनयः, सत्यं, श्रमः, जिजीविषा, विजिगीषा, वीरता, एकता, राष्ट्रियता, राष्ट्र-गौरवं, देशभक्तिः, कर्त्तव्य-निष्ठा, जीवनास्था च - इत्यादिजीवनमूल्यानां शिक्षणाय सामग्री गुम्फिताऽस्ति। राजस्थानस्य गौरवेण छात्राः परिचिताः स्युरिति केचन पाठाः रचिताः। स्वातन्त्र्य-संग्राम-प्रवर्तकः महाराणा-प्रतापस्तु पुस्तकेऽस्ति एव। स्वामिकेशवानन्दस्य, महाराजसूरजमल्लस्य चापि प्रेरकं जीवनचरितम् इदम्प्रथमतयाऽत्र पठिष्यन्ति छात्राः।

लेखनं स्तरानुकूलं, ग्राह्यं, सोद्देश्यं च विधातुं यत्नः कृतः। ऐतिहासिक वृत्तान्तादि-निरूपणे **'नामूलं लिख्यते किञ्चिद्'** इति निकषं पुरतो निधाय तथ्यानां प्रामाणिकता सविशेषं रक्षिता। सरलतायाः, रोचकतायाः, नवीनतायाः, विषय-वैविध्यस्य, विस्मयस्य, मनोरञ्जनस्य च तत्त्वं न तिरोहितमभूदिति प्रयतितम् येन पुस्तकमिदम् आनन्दोपलब्धि-साधनं स्यान्नतु नीरसता-साधनम्।

सहजेन पाठ-बोधाय, पाठं प्रति छात्राणाम् उन्मुखीकरणाय च प्रत्येकं पाठस्यादौ तत्तत्पाठ-परिचायकं सारगर्भितं विवरणमपि प्रदत्तमस्ति। छात्राणामभ्यासार्थं बालमनोविज्ञानम् उच्चावचं छात्रस्तरं च दृष्टौ निधाय अभ्यास-प्रश्नाः तथा वैविध्येन कल्पिताः येन ज्ञान-शक्तेः विभिन्न-पक्षाणां तद्यथा अवबोधः (Understanding), प्रत्यास्मरणं (Recall), प्रत्यभिज्ञानं (Recognition), कौशलं (Skill), प्रयोगः (Application) - इत्यादीनां विकासः मूल्याङ्कनं च सुकरं भवेत्।

शिक्षकेषु निवेदनम् : पुस्तकमिदं प्रायशः सरल-संस्कृत-माध्यमेन लिखितमस्ति। शिक्षकाः विनिवेद्यन्ते यत्ते व्याकरणानुवादविधिं (Grammar Translation Method) परित्यज्य पुस्तकं संस्कृत-माध्यमेनैव पाठयन्तु। कक्षायां संस्कृतमयं वातावरणं निर्मातुं पुस्तकगत-श्लोकानां गीतानां च सस्वर-वाचनस्य गायनस्य च अभ्यासं कारयन्तु। संस्कृतच्छन्दसां सस्वर-पाठस्य अभ्यासः भवतां नास्ति चेद् स्वयं कुतश्चिदभ्यस्य ततः कारयन्तु। संस्कृतमधिगन्तुं भाषितुं च शुद्ध-वर्णोच्चारणस्य अभ्यासोऽपि परमावश्यकः। एकैकस्य पाठस्य प्रश्नानाम् अभ्यासं कक्षायां कारयन्तु। परिशिष्टगतस्य व्याकरणादेरपि सदुपयोगं कुर्वन्तु इति।

अस्य पाठ्यपुस्तकस्य प्रणयने प्रत्यक्षं परोक्षं वा यस्य यस्य यत्किमपि साहाय्यं प्राप्तं तस्य तस्य कृते हार्दं कार्तज्ञं ज्ञापयामः। पुस्तकमधीयानाः छात्राः संस्कृत-सम्भाषणे लेखने च सफलाः भवन्ति चेदेव अस्माकं श्रमस्य आयासस्य च साफल्यमस्तीति मन्यामहे-

**'क्लेशः फलेन हि पुनर्नवतां विधत्ते।'**

**लेखकगणः**

# कक्षा : 10 ( दशमी )

## विषय : संस्कृतम्

### पाठ्यक्रमः

**समयः – 3:15 होराः ( घण्टे )** **पूर्णाङ्काः – 80**

| क्र.सं. | अधिगम-क्षेत्रम् | अङ्कभारः |
|---|---|---|
| 1. | पठितावबोधनम् | 27 |
| 2. | अपठितावबोधनम् | 10 |
| 3. | व्याकरणम् | 25 |
| 4. | रचनात्मककार्यम् | 18 |
| | | 80 |

| क्र.सं. | पाठ्यवस्तु | अङ्कभारः |
|---|---|---|
| **1.** | **पठितावबोधनम्** | **27** |
| (i) | पाठ्यपुस्तकात् गद्यांशस्य हिन्दीभाषया अनुवादः (द्वयोः एकस्य) | 5 |
| (ii) | पाठ्यपुस्तकात् पद्यांशस्य हिन्दीभाषया अनुवादः (द्वयोः एकस्य) | 5 |
| (iii) | पाठ्यपुस्तकात् पद्यांशस्य संस्कृतव्याख्या (द्वयोः एकस्य) | 4 |
| (iv) | पाठ्यपुस्तकात् नाट्यांशात् संस्कृत-व्याख्या (द्वयोः एकस्य) | 3 |
| (v) | प्रश्नोत्तराणि-संस्कृतमाध्यमेन अष्टसु पञ्चप्रश्नानाम् | 3 |
| (vi) | प्रश्ननिर्माणम् | 4 |
| (vii) | पाठ्यपुस्तकात् श्लोकद्वयलेखनम् | 3 |

**2. अपठितावबोधनम्** **10**

80–100 शब्दपरिमितः (एकः सरलः गद्यांशः)

| | | |
|---|---|---|
| (i) | शीर्षकप्रदानम् | 1 |
| (ii) | संस्कृत-माध्यमेन प्रश्नोत्तराणि | 5 |
| (iii) | अनुच्छेदाधारितं भाषिककार्यम् | 4 |

'भाषिककार्यम्' इत्यनेन अभिप्रेतम् अस्ति-

(i) वाक्येषु कर्तृक्रियापदचयनम्

(ii) कर्तृ-क्रियान्विति:

(iii) विशेषण-विशेष्यान्विति:

(iv) संज्ञास्थाने सर्वनामप्रयोग: अथवा सर्वनामस्थाने संज्ञाप्रयोग:

(v) पर्यायपदं विलोमपदं वा अनुसृत्य अनुच्छेदे तत्समानपदस्य अन्वेषणम्

## 3. व्याकरणम् 25

**(i) संधि: -** **4**

(अ) स्वरसंधि: - वृद्धि:, यण्, अयादि:, पूर्वरूपम्, पररूपम्

(आ) व्यजनसंधि: - परसवर्ण:, मोऽनुस्वार:, जश्त्वम्

(वर्गाणाम् प्रथमाक्षराणाम् स्थाने तृतीयवर्ण-परिवर्तनम्)

(इ) विसर्गसंधि: - विसर्गस्य उत्वं, रुत्वं, लोप:, विसर्गस्थाने श्, ष्, स्।

**(ii) समास: -** **3**

अव्ययीभाव:, कर्मधारय:, द्वन्द्व:

(वाक्येषु समस्तपदानां विग्रह:, विग्रहपदानां च समास:।)

**(iii) कारकाणि -** **3**

उपपद-विभक्तीनां प्रयोगा:, तेषां सामान्यनियमानां परिचयश्च।

**(iv) प्रत्यया:** **4**

(अ) कृदन्ता: - तव्यत्, अनीयर्, शतृ, शानच्

(ब) तद्धिता: - मतुप्, इन्, ठक्, त्व, तल्

(स) स्त्रीप्रत्ययौ - टाप्, ङीप्

**(v) अव्ययपदानि** **3**

(पाठ्यपुस्तके कथायाम्, अनुच्छेदे, संवादे, पद्ये वा अव्ययानाम् प्रयोगा:)

अपि, इति, इव, उच्चैः, कदा, कुतः, नूनम्, पुरा, मा, इतस्ततः, यत्, अत्र, तत्र, कुत्र, इदानीम्, सम्प्रति, यदा, कदा, यथा, तथा, विना, सहसा, श्वः, ह्यः, अधुना, बहिः, वृथा, कदापि, शनैः, किम्, यावत्, तावत्।

| | | |
|---|---|---|
| **(vi)** | **वाच्य-परिवर्तनम्** (लट्लकारे) | **3** |
| **(vii)** | **समयलेखनम्** (घटिका-चित्र-साहाय्येन अङ्कानां स्थाने शब्दैः) | **2** |
| **(viii)** | **अशुद्धिसंशोधनम्** - | **3** |
| | वाक्येषु लिङ्ग-विभक्ति-वचन-पुरुष-लकाराधारितम् अशुद्धिसंशोधनम्। | |

## 4. रचनात्मक-कार्यम् — 18

| | | |
|---|---|---|
| (i) | कमपि विषयं स्वीकृत्य प्रार्थनापत्रं/आत्मीयजनान् प्रति अनौपचारिकं पत्रम् | 4 |
| (ii) | संकेताधारित संवादलेखनम् | 4 |
| (iii) | अनुवादकार्यम् - हिन्दीभाषायाः षड्वाक्येषु चतुर्णां वाक्यानां संस्कृतभाषया अनुवादः | 4 |
| (iv) | चित्राधारितं वर्णनम् | 3 |
| (v) | कथाक्रमस्य संयोजनम् (सुपरिचित-कथानाम् क्रमरहितानां षड्वाक्यानाम् क्रमपूर्वकं संयोजनम्) | 3 |